विरोचनपुत्रे ६दैत्यभेदे च “येन बद्धो बलीराजा दानवेन्द्रो महाबलः” रक्षाबन्धनमन्त्रः। ७जरया श्लथचर्म्मणि स्त्री० ङीप्। “गृहस्थस्तु यदा पश्येत् बलीपलितमात्मनः” इति मनुः। ७उदरावयवभेदे “बलि० त्रयं चारु बभार बाला” इति कुमारः। ८गुह्यास्ये अङ्कुराकारे मांसपिण्डे, वैद्यकम् अर्शस्शब्दे दृश्यम्। ९गृहदारुभेदे च (पाड़) स्त्री० स्वार्थे क। बलिका तत्रार्थे अतिबलायाञ्च राजनि०। १०ययातिवंश्यसुतपोन्धपपुत्रे विष्णु पु०। दानवभेदकथा भाग० ८स्क० दृश्या।

वैश्वदेवबलिकरणप्रकारः मार्क० पु० उक्तो यथा। “ततोऽग्नेस्तर्पणं कुर्य्याद्दद्याच्च बलिमित्यथ। ब्रह्मणे गृहमध्ये तु विश्वदेवेभ्य एव च। धन्वन्तरिं समुद्दिश्य प्रागुदीच्यां बलिं क्षिपेत्। प्राच्यां शक्राय, याम्यायां यमाय बलिमाहरेत्। प्रतीच्यां वरुणायैव सोमायोत्तरतो बलिम्। दद्याद्धात्रे विधात्रे च बलिं द्वारे गृहस्य च। अर्य्यम्णे च बलिं दद्यात् गृहेभ्यश्च समन्ततः। नक्तञ्चरेभ्यो भूतेभ्यो बलिमाकाशतो हरेत्। पितॄणां निर्व्वपेच्चैव दक्षिणाभिमुखस्थितः। गृहस्थस्तत्परो भूत्वा सुसमाहितमानसः। ततस्तोयमुपादाय तिष्ठेदाचमनाय वै। स्थानेषु निक्षिपेत् प्राज्ञस्तास्ता उद्दिश्य देवताः। एवं गृहबलिं कृत्वा गृहे गृहपतिः शुचिः। आप्यायनाय भूतानां कुर्य्यादुत्सर्गमादरात्। श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्च वपेद्भुवि। वैश्वदेवं हि नामैतत् सायं प्रातरुदाहृतम्”।

देवोद्देश्यकबलिविशेषादिकं यथा

“साधकैर्बलिदानेषु ग्राह्याः सर्व्वसुरस्य तु। पक्षिणः कच्छपा ग्राहा मत्स्या नवविधा मृगाः। महिषो गोधिका गावश्छागो बभ्रुश्च शूकरः। खड्गश्च कृष्णसारश्च गोधिका शरभो हरिः। शार्दूलश्च नरश्चैव स्वगात्ररुधिरन्तथा। चण्डिकाभैरवादीनां बलयः परिकीर्त्तिताः। बलिभिः साध्यते मुक्तिर्बलिभिः साध्यते सुखम्। बलिदानेन सततं जयेत् शत्रून् नृपान् नृपः। मत्स्यानां कच्छपानाञ्च रुधिरैः सततं शिवा। मासैकं तृप्तिमायाति ग्राहैर्मासांस्तु त्रीनथ। मृगाणां शोणितैर्देवी नराणामपि शोणितैः। अष्टौ मासानवाप्नोति तृप्तिं कल्याणदा च सा। गोगोधिकानां रुधिरैर्व्वार्षिकीं तृप्तिमाप्नुयात्। कृष्णसारस्य रुधिरैः शूकरस्य च शोणितैः। आप्नोति सततं देवी तृप्तिं द्वादशवार्षिकीम्। महिषाणाञ्च खड्गानां रुधिरैः शतवार्षिकीम्। तृप्तिमाप्नोति परमां शार्दूलरुधिरैस्तथा। सिंहस्य शरभस्याथ स्वगात्रस्य च शोणितैः। देवी तृप्तिमवाप्नोति सहस्रं परिवत्सरान्। मांसैरपि तथा प्रीती रुधिरैर्यस्य यावती। कृष्णसारस्तथा खड्गं तथा मत्स्यञ्च रोहितम्। वार्द्धीनसयुगस्यापि फलं तेषां पृथक् शृणु। कृष्णसारस्य मांसेन तथा खड्गेन चण्डिका। वर्षान् पञ्च शतान्येव तृप्तिमाप्नोति केवलाम्। रोहितस्य तु मत्स्यस्य मांसैर्वार्द्धीनसस्य च। तृप्तिमाप्नोति वर्षाणां शतानि त्रीणि मत्प्रिया। त्रिःपिबन्त्वीन्द्रियक्षीणः श्वेतो वृद्धस्त्वजापतिः। वार्द्धीनसः प्रोच्यतेऽसौ हव्ये कव्ये च सत्कृतः। नीलग्रीवो रक्तशीर्षः कृष्णपादः सितच्छदः। वार्द्धीनसः स्यात् पक्षीशो मम विष्णो रतिप्रियः। “मन्त्रपूतं शोणितन्तु पीयूषं जायते सदा। मस्तकञ्चापि तस्यास्ति मांसञ्चापि सदा शिवा। तस्मात् पूजने दद्याद्बलेः शीर्षञ्च लोहितम्। भोज्ये होमे च मांसानि नियुञ्जीयाद्विचक्षणः। पूजासु नाऽऽम मांसानि दद्याद्वै साधकः क्वचित्। कृते तु लोहितं शीर्षमस्तं तत्तु जायते। कुष्माण्डमिक्षुदण्डञ्च मद्यमासवमेव च। एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा। चन्द्रहासेन कर्त्र्या वा छेदनं मुख्यमिष्यते। दात्रासिधेनुक्रकचसङ्कुलाभिस्तु मध्यमम्। क्षुरच्छुरप्रभल्लैश्चैवाधमं परिकीर्त्तितम्। एभ्योऽन्यैः शक्तियाणाद्यैर्बलिच्छेद्यः कदापि न। नाप्ति देवी बलिं तन्तु दाता ह्यत्युग्रमाप्नुयात्। हस्तेन च्छेदयेद्यस्तु प्रोक्षितं साधकः पशुम्। पक्षिणं वा ब्रह्महत्यां सोऽवाप्नोति सुदुःसहाम्। नामन्त्र्य खड्गन्तु बलिं नियुञ्जीत विचक्षणः।” “पशूनां पक्षिणाञ्चापि नराणाञ्च विशेषतः। स्त्रियं न दद्यात्तु बलिं दत्त्वा नरकमाप्नुयात्। अज्ञातबलिदानेषु योषितं पशुपक्षिणोः। बलिं दद्यान्नानुषीन्तु त्यक्त्वा अज्ञातपूजितम्। न त्रिमासीयकान्न्यूनं पशुं दद्यात् शिवाबलिम्। न च त्रिपक्षकान्न्यूनं प्रदद्याद्वै पतत्त्रिणम्। काणाभ्यङ्गादिदुष्टन्तु न पशुं पक्षिणन्तथा। देव्यै दद्याद्यथामत्यैस्तथैव पशुपक्षिणौ। छिन्नलाङ्गूलकर्णादिभग्नदन्तन्तथैव च। भग्नशृङ्गादिकञ्चापि न दद्यात्तु कदाचन।” “नारं सव्ये शिरोरक्तं देव्याः सम्यक् निवेदयेत्। छागन्तु वामतो दद्यान्महिषं वितरेत् पुरः। पक्षिणं वामतो दद्यादग्रतो देह